## द्वितीयाध्यायस्य चतुर्थः पादः

### द्विगुरेकवचनम् । (१/७३१)

द्विगुः समासः एकवचनं भवति । एकस्य वचनम् एकवचनम् । एकस्यार्थस्य वाचको भवति [1]इत्यर्थः । तदनेन प्रकारेण[2] द्विग्वर्थस्यैकवद्भावो विधीयते, द्विग्वर्थ एकवद् भवति इति[3] । समाहारद्विगोश्चेदं ग्रहणम्, नान्यस्य । [4]पञ्चपूलाः समाहृताः [5]पञ्चपूली । दशपूली । [6]द्विग्वर्थस्यैकत्वादनुप्रयोगेऽप्येकवचनं भवति, [7]पञ्चपूलीयं शोभना [8]इति[9] ॥

### द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । (२/९०६)

एकवचनम् इति वर्तते । अङ्गशब्दस्य प्रत्येकं [10]वाक्यपरिसमाप्त्या त्रीणि वाक्यानि सम्पद्यन्ते । प्राण्यङ्गानां द्वन्द्व एकवद् भवति, तथा [11]तूर्याङ्गानां सेनाङ्गानां च । प्राण्यङ्गानां तावत् – पाणिपादम् । शिरोग्रीवम्[12] । तूर्याङ्गानाम् – मार्दङ्गिकपाणविकम् । वीणावादकपरिवादकम् । सेनाङ्गानाम् – [13]रथिकाश्वारोहम् । रथिकपादातम् । हस्त्यश्वादिषु परत्वात् पशुद्वन्द्वे [14]विभाषया एकवद् (२.४.१२/९१६) भवति ।

इतरेतरयोगे समाहारे च द्वन्द्वो विहितः । तत्र समाहारस्यैकत्वात् सिद्धमेवैकवचनम् । इदं तु प्रकरणं विषयविभागार्थम्, [15]प्राण्यङ्गादीनां समाहार [16]एव द्वन्द्वः, दधिपयआदीनामितरेतरयोग एव (२.४.१४/९१८), वृक्षमृगादीनाम् (२.४.१२/९१६) उभयत्र इति ॥

### अनुवादे चरणानाम् । (३/९०७)

चरणशब्दः शाखानिमित्तकः [17]पुरुषेषु वर्तते । चरणानां द्वन्द्वः एकवद् भवति अनुवादे गम्यमाने । प्रमाणान्तरावगतस्यार्थस्य शब्देन सङ्कीर्तनमात्रम् अनुवादः । उदगाद् कठकालापम् । प्रत्यष्ठात् कठकौथुमम् (म. भा. १.४७४) । [18]कठकालापादीनामुदयप्रतिष्ठे प्रमाणान्तरावगते यदा पुनः शब्देनानूद्येते [19]तदैवमुदाहरणम् । [20]यदा तु प्रथमत एवोपदेशस्तदा प्रत्युदाहरणम् । अनुवादे इति किम् ? उदगुः कठकालापाः । [21]प्रत्यष्ठुः कठकौथुमाः ।

[१५२] स्थेणोरद्यतन्यां चेति वक्तव्यम् । (म.भा. १.४७४)

स्थेणोः इति किम् ? अनन्दिषुः कठकालापाः । अद्यतन्याम् इति किम् ? उद्यन्ति कठकालापाः ॥

### अध्वर्युक्रतुरनपुंसकम् । (४/९०८)

[22]अध्वर्युवेदे यस्य क्रतोर्विधानं सोऽध्वर्युक्रतुः[23] । अध्वर्युक्रतुवाचिनां [24]शब्दानामनपुंसकलिङ्गानां द्वन्द्वः एकवद् भवति । अध्वर्युक्रतुरनपुंसकं [25]द्वन्द्वः इति [26]गौणो निर्देशः[27] । [28]अर्काश्वमेधम् । सायाह्नातिरात्रम् । [29]अध्वर्युक्रतुः इति किम् ? इषुवज्रौ । उद्भिद्बलभिदौ । अनपुंसकम् इति [30]किम् ? [31]राजसूयवाजपेये । इह कस्मान् न भवति, दर्शपौर्णमासौ ? क्रतुशब्दः सोमयागेषु रूढः ॥

---

1. अर्थः नास्ति ड. 2. द्विगुत्वस्य ह. 3. यावत् इत्यधिकम् फ. 4. पञ्चकपालाः फ. 5. पञ्चकपाली, दशकपाली फ. 6. अर्थस्यैकत्वाद् ब.ह.ग. 7. पञ्चमूलीयं ड. 8. इति नास्ति फ. 9. पञ्चराजी इत्यधिकम् ड. 10. परिसमाप्त्या ड.इ.ह, °परिसमाप्तेः क. 11. तूर्याङ्गसेनाङ्गानां च फ. 12. दन्तोष्ठम् इत्यधिकम् फ. 13. रथिकाश्वारोहम् नास्ति, रथिकपदातम् ड, पथिकपादातम् ह. 14. विभाषयैव भविष्यति फ, विभाषयैव भवितव्यं ब, पशुद्वन्द्वविभाषयैव भवितव्यं क.ड.इ.ह. 15. प्राण्यङ्गानां फ. 16 एव नास्ति फ. 17. गौणः इत्यधिकम् क.फ. 18. कठकालापानाम् फ. 19. तदेवेदमुदाहरणं ड.इ, तदैवेतदुदाहरणम् फ. 20. वाक्यमिदं नास्ति ब. 21. उदगात् कठकालापम्, प्रत्यष्ठात् कठकौथुमम् इत्यधिकम् ड.इ. 22. अध्वर्युवेद्ये ह. 23. यज्ञः इत्यधिकम् फ. 24. शब्दानाम् नास्ति ह. 25. द्वन्द्वः नास्ति फ. 26. गौणो नास्ति ड. 27. अवयवधर्मस्य समुदायव्यपदेशात् पौण्डरीकत्रिरात्रम् इत्यधिकम् ड. इ. फ, साप्तातिरात्रम् इत्यधिकम् क. इ. 28. अर्काश्वमेधिकम्, सहातिरात्रम् ह. 29. अध्वर्युः ह. 30. किमर्थम् इ. 31. वाजपेयराजसूये फ.